International Journal of Sanskrit Research 2021; 7(3): 79-83

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(3): 79-83
© 2021 IJSR
www.anantaajournal.com
Received: 19-02-2021
Accepted: 03-04-2021

मानस कुमार घोषः
गवेषकः, विश्वभारती शिक्षकः
(SACT), पि.एन्. दास कलेज्,
पश्चिम बंगाल, भारत

Corresponding Author:
मानस कुमार घोषः
गवेषकः, विश्वभारती शिक्षकः
(SACT), पि.एन्. दास कलेज्,
पश्चिम बंगाल, भारत

# वैयाकरणः मल्लिनाथः - रघुवंशमहाकाव्यस्य सञ्जीविनी-टीकानुसारे एका समीक्षा

## मानस कुमार घोषः

**विषयसंक्षेपः**
संस्कृतभाषायाः प्रायेण सर्वास्वेव शाखासु विरचितानां ग्रन्थानामर्थावगमो विना टीकया न सम्भवति । एतस्मिन् कारणे कविकर्मणां मर्मार्थं सुखेन बोधयितुं काले काले विद्वद्भिर्बह्वष्टीकाः विरचिताः । तत्र महाकाव्यानां व्याख्यातृषु बहुषु समुपलभ्यमानेष्वपि तत्रभवतो मल्लिनाथस्य स्थानमुच्चैर्विद्यते । संस्कृतभाषायाः प्रायेण सर्वास्वेव शाखासु यथा न्यायदर्शने, वैशेषिकदर्शने, ज्योर्विविद्यायां, तन्त्रे, नीतिशास्त्रे, व्याकरणशास्त्रे, पुराणधर्मशास्त्रादिषु तस्य पाण्डित्यमासीदिति तदीयटीकाध्ययनेन अस्माभिः विज्ञायते । परन्तु व्याकरणसाशास्त्रे तस्य सर्वाधिकं पाण्डित्यं आसीदिति तदीयटीकाध्ययनेन वक्तुं शक्यते । विशेषतः मल्लिनाथः व्याख्याकारः आसीत् इति वयम् जानीमः, किन्तु सः वैयाकरणः अपि आसीत् इति मे शोधपत्रस्य आलोच्य विषयः। शोधपत्रेऽस्मिन् मल्लिनाथस्य व्याकरणशास्त्रविषयकं यद् ज्ञानं रघुवंशमहाकाव्यस्य सञ्जीविनीटीकायां लभ्यते तस्य समुपस्थापनं यथामति क्रियते ।

**कूटशब्दः** व्याकरणः, टीका, विजज्ञे, वार्तिकः, भाष्यः, अहिरण, दृढभक्तिः इत्यादयः।

**भूमिकाः**
शास्त्रार्थस्य परिष्करणविधौ टीकाजातीया व्याख्यानरीतिः सुप्राचीनवैदिक-कालादारभ्य साम्प्रतिककालं यावत् प्रवहनशीला विराजते संस्कृतभाषायाम् । विविधे समयसीमनि लब्धजन्मानो यास्कसायणपतञ्जलिवामन-जयादित्यशङ्कराचार्यवाचस्पतिमिश्राभिनवगुप्त-दक्षिणार्तनाथमल्लिनाथप्रमुखा असंख्येया मनीषिणः स्वस्वटीकाजातीयव्यानमाध्यमेन वेद-व्याकरण-दर्शनालंकार-काव्यादि-शास्त्राणामन्तर्गूढं रहस्यं प्रकटीकूर्वाणाः सास्मर्यन्ते । विविधपरम्परावगाहिषु टीकाकारेषु खृष्टीयचतुर्दशशताब्दीसम्भवस्य-कोलाचलसुरेः मल्लिनाथस्य विद्यते विशिष्टमेकं स्थानमिति विहितमेव समेषां विपश्चिदपश्चिमानाम् । तेन खलु महात्मना काव्यालंकारदर्शनादि अनेकासु शास्त्रधारासु महार्घाः टीका विरचिता यास्तावत्तत्त्च्छास्त्र-तात्पर्याववोधाय सुतरामेवापेक्षिताः । तथाहि काव्यशास्त्रशाखायां महाकवेः कालिदास्य रघुवंशमहाकाव्यस्योपरि “सञ्जीविनी” इति टीका तेन विरचिता ।
संस्कृतभाषायाः प्रायेण सर्वास्वेव शाखासु मल्लिनाथस्य पाण्डित्यमासीदिति तदीयटीकाध्ययनेन अस्माभिः विज्ञायते ।

परन्तु व्याकरणशास्त्रे मल्लिनाथस्यापरिसीमं पाण्डित्यमभिलक्ष्य स व्याकरणाचार्य आसीदिति वक्तुं शक्यते । यद्यपि तेन किमपि व्याकरणशास्त्रं न प्रणीतं तथापि विविधानि व्याकरणशास्त्राणि सम्यगधीतानीति तदीयटीकाध्ययनेन विज्ञायते । तेन प्रायेण सर्वत्र पदानां व्याकरणदिशा विवेचनावसरे पाणिनिमतमेवानुसृतम् । क्वचित् क्वचित् विशेषतः पदानां कारकविवेकावसरे, समासपर्यालोचनकाले, स्त्रीप्रत्ययनिरुपणप्रसङ्गे, कृत्प्रत्ययविमर्षणवेलायां, धातोरात्मनेपदित्वसमीक्षणसमये तु स्वकीयविवेचनस्याप्रमादत्वनिरुपणार्थं वार्तिककारमहाभाष्यकारादीनामपरेषामपि व्याकरणाचार्याणामभिमतं समुपनिवद्धम् । विस्तृतिभयात् पाणिनेः सुत्रपरिगणनं नात्र क्रियते । यत्र तु पाणिनिमन्यान् च वार्तिककारादीन् आचार्यानुल्लिख्य तेषामभिमतमुस्थापितं तेषां परिगणनं मया विधीयते ।

**पाणिनिः**

व्याकरणाचार्याणामाचार्यस्य पाणिनेः श्रेष्ठत्वं न केवलं प्राच्यपण्डितैरपितु पाश्चात्यविद्वद्भिरपि समर्थितम् । अष्टाध्यायीनामकं व्याकरणग्रन्थं विरचय्य तस्य ख्यातिश्चतुर्दिक्षु सम्प्रसारिता । यस्मिन् च ग्रन्थे अष्टाध्यायाः सन्ति, यस्य च ग्रन्थस्य प्रामाणिकत्वं तत्परवर्तिभिः प्रायेण सर्वैरेव विद्वद्भिः स्वीकृतम् । अयं ग्रन्थः टीकाकारेण मल्लिनाथेन सम्यगधीतः इति तदीय रघुवंशमहाकाव्यस्य सञ्जीविनी इति टीकाध्ययनेन अवगम्यते । यद्यपि तेन प्रायेण सर्वत्र पाणिनिमतमनुसृत्यैव पदानां व्याख्यानं विहितं तथापि तत्र सर्वत्र प्रत्यक्षतः पाणिनेरष्टाध्याय्याः नाम नोल्लिखितम् । केवलम् ''आराध्य विश्वेश्वरमीश्वरेण''[1] – इत्यादि पदस्य टीकायां 'विजज्ञे' इति धातोरर्थविवेचनप्रसङ्गे मल्लिनाथेन पाणिनेरुल्लेखः कृतः । तथाहि – ''विजज्ञे सुषुवे' । विपूर्वो जनिर्गर्भविमोचने वर्तते । यथाह भगवान् पाणिनिः –'' समां समां विजायते ''[2] इति ।''

**वार्तिककारः**

उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते तन्नाम वार्तिकम् । व्याकरणाचार्यः कात्यायनः पाणिनीयसूत्राणामसम्पूर्णतानिराकरणार्थं वहुनि वार्तिकानि रचयित्वा समधिकतया ख्यातिमान् जातः । व्याख्याकारः मल्लिनाथः वार्तिककारेण पाणिनिसूत्राणि अवलम्ब्य विरचितानि वार्तिकानि सम्यक् अधीतवान् इति तस्य टीकापर्यालोचनेन विज्ञायते । तेन पदानां व्याख्यानावसरे वहुत्र वार्तिकसूत्राणि समुपस्थापितानि । तथाहि – '' तेनाभिघातरभसस्य सव्यसाची यदस्त्रम् -''[3] इत्यादिपद्यस्य टीकायां - 'पातयां प्रथममास' इत्यस्यापप्रयोगत्वं वार्तिककारमतमुपस्थाप्यैवं दर्शितं मल्लिनाथेन – '' कृञ्चानुप्रयुज्यते लिटि' ' इत्यत्रानुशब्दस्य व्यवहितविपर्यस्तप्रयोगनिवृत्तर्थत्वात् ''पातयां प्रथममास'' इत्यपप्रयोग इति पाणिनीयाः । यथाह वार्तिककारः – विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्त्यर्थं च (वा. 1823 -24) इती'' ति।

**महाभाष्यकारः**

महाभाष्यकारेण पतञ्जलिना पाणिनीयसूत्राणामुपरि भाष्यं रचयित्वा परमां कीर्तिमलभत । पतञ्जलेः भाष्यं महाभाष्यनाम्नैव परिचितम् । तत्र पञ्चाशीतिराह्निकाः सन्ति । तच्च मल्लिनाथेन सम्यक् पठितमित्यस्य प्रमाणं तेन विरचितायां रघुवंशमहाकाव्यस्य सञ्जीविनीटीकायां सुप्रापमेव । तेन व्याकरणदिशा विवेचनावसरे क्वचित् क्वचित् महाभाष्यकारस्याभिमतं समुपनिबद्धम् । तथाहि – ''अथ प्रजानामधिपः प्रभाते -''[4] इत्यादिपद्यस्य टीकायां ''पीत'' पदस्य साधुत्वविवेकावसरे महाभाष्यकारस्याभिमतमेवं समुल्लिखितम् - '' पीतं पानमस्यास्तीति पीतः पीतवान् इत्यर्थः । ''अर्शआदिभ्योऽच्'' इति अच् प्रत्ययः, ''पीता गावो भुक्ता ब्राह्मणाः'' (पा. 3/4/67 – म.भा.) इति महाभाष्ये दर्शनात्'' इति ।

**काशिकावृत्तिः**

पाणिनीयसूत्राणामुपरि विरचितासु टीकासु काशिकावृत्तेः समादरो विद्वद्भिः समधिकतया क्रियते । अष्टाध्यायात्मकस्यास्य ग्रन्थस्य प्रथमाध्यायपञ्चकं जयादित्येन, अन्तिमाध्यायत्रयञ्च वामनेन विरचितमिति विद्वद्भिर्मन्यते । ग्रन्थोऽयं मल्लिनाथेन सम्यक् परिशीलितः । तेन तदीयटीकायां पदानां व्याकरणदिशा व्याख्यानवसरे क्वचित् 'काशिका' इति, क्वचित् 'वृत्तिकारः' इति च समुल्लिख्य प्रमाणानि समुपन्यस्तानि । तानि यथा – '' प्रातर्यथोक्तव्रतपारणान्ते -' '[5] इत्यादिपद्यस्य टीकायां प्रास्थानिकम् इत्यत्र ''कालात् ठञ्'' इत्यनेन ठञ् प्रत्ययस्य याथार्थ्यविवेचनकाले प्रमाणमाह - ' ' यथाकथञ्चिद्गुणवृत्त्यापि काले वर्तमानत्वात् प्रत्यय इष्यते इति वृत्तिकारः''[6] इति ।

"युवा युगव्यायतबाहुरंसलः -"[7] इत्यादिपद्यस्य व्याख्यायाम् 'अंसल' पदस्यार्थविवेकावसरे मल्लिनाथेनोक्तम् – ' ' अंसावस्य स्त इत्यंसलो बलवान् । मांसलश्च ' ' इति वृत्तिकारः' '[8] इति । ' 'अथाङ्गराजादवतार्य चक्षुः-' '[9] इत्यादिपद्यस्य टीकायां ' 'जन्ये' '-ति पदस्यार्थनिर्णयकाले प्रमाणत्वेन वृत्तिकारवचनमेवमुपनिबद्धम् - ' ' यदत्राह वृत्तिकारः - " जनीं वधूं वहन्तीति जन्या जामातुर्वयस्याः" इती' '[10] ति । ' 'असौ कुमारस्तमजोऽनुजातः - ' '[11] इत्यादिपद्यस्य टीकायां "तमजोऽनुजात" इत्यत्रानुपूर्वकाज् जनेः सोपसृष्टत्वात् सकर्मकत्वे प्रमाणमाह - "आह चात्रैव सूत्रे वृत्तिकारः -" श्लिषादयः सोपसर्गाः सकर्मका भवन्ति इती"[12] ति ।

**वामनः**

संस्कृतसाहित्यस्येतिहासे काशिकावृत्तेः कर्तुर्वैयाकरणस्य वामनस्य यथा विशिष्टं स्थानमस्ति तथा काव्यालंकारसूत्रवृत्तेः प्रणेतुरालंकारिकस्य वामनस्य । मल्लिनाथेन तदीयटीकासु पदानां व्याकरणदिशा व्याख्यानकाले ' 'इति वामन' ' इत्येवमुक्त्वा यानि प्रमाणवाक्यानि समुपनिबद्धानि तानि सर्वाणि तु काव्यालंकारसूत्रवृत्तेः प्रायोगिके नाम पञ्चमाधिकरणे प्राप्यन्ते । तथाहि - ' 'तस्य पाण्डुवदनाल्पभूषणा -' '[13] इत्यादिपद्यस्य टीकायां ' 'कामयानसमवस्थये' ' त्यत्र कामयानशब्दव्याख्यानावसरे मल्लिनाथेन वामनमतमुल्लिख्यैवं विवेचितम् – कामयते विषयानिच्छति कामयानः कामयानः । कमेर्णिङन्ताच्छानच् । ' 'अनित्यमागमशासनम्' ' इति नुमागमाभावः, एतदेवाभिप्रेत्योक्तं वामनेनापि – ' 'कामयानशब्दः सिद्धोऽनादिश्च इती"[14] ति।

**क्षीरस्वामी**

अमरविरचितस्यामरकोषस्यामरकोषोद्घाटनटीकाकर्ता क्षीरस्वामी एकादशशताब्दा द्वितीयार्द्धे आविर्भूत इति विदुषां मतम् । टीकामिमाञ्च रचयित्वा स यथा ख्यातिमान् जातस्तथा पाणिनेर्धातुपाठस्योपरि क्षीरतरङ्गिनीं नाम टाकां विरचितवान् । तेन अव्ययवृत्तिर्निपाताव्ययोपसर्गचेति ग्रन्थद्वयं विरचितमिति कैश्चिन्मन्यते । मल्लिनाथेन तदीयटीकासु शव्दानामर्थनिर्णयावसरे पदानां व्याकरणदिशा व्याख्यानकाले च क्वचित् क्वचित् क्षीरस्वामिमतानि समुपनिवद्धानि । तानीमानि –

"स्निग्धगम्भीरनिर्घोषम् - ''[15] इत्यादिपद्यस्य टीकायां " विद्युदैरावतौ'' इत्यस्य व्याख्यानं क्षीरस्वामिमतमनुसृत्यैवं विहितं – इरावान् समुद्रः । तत्र भव ऐरावतोऽभ्रमातङ्गः । ' 'अभ्रमातङ्गत्वाच्चाभ्रस्थत्वादभ्ररूपत्वात्' ' [16] इति क्षीरस्वामी । अतएव मेघारोहणं विद्युत्साहचर्य च घटते । किं च विद्युत् ऐरावतोऽसाहचर्यादैरावती संज्ञा । ' ' ऐरावतस्य स्त्र्यैरावती"[17] इति क्षीरस्वामी । तस्मात् सुष्ठूक्तं विद्युदैरावताविति" इति ।

' 'तस्योपकार्यारचितोपचाराः' ' [18] इत्यादिपद्यस्य टीकायां उपकार्येति पदस्यार्थः क्षीरस्वामिमतमुल्लिख्यैवं विहितो मल्लिनाथेन - ' 'उपकार्यासु राजयोग्येषु पटभवनादिषु । सौधोऽस्त्रीराजसदनमुपकार्योपकारिका इत्यमरवचनव्याख्याने क्षीरस्वामी – "उपक्रियत उपकरोति च पटमण्डपादि राजसदनम्"[19] इति ।

"तमलभन्त पतिं पतिदेवताः" [20] इत्यादिपद्यस्य टीकायां ' आपगाः' इत्यस्य व्युत्पत्तिप्रदर्शनकाले मल्लिनाथेन क्षीरस्वामिमतमुल्लिमुल्लिखितम् - ' 'आपेनाप्सम्बन्धिना वेगेन गच्छन्तीत्यापगाः" इति क्षीरस्वामी"[21] इति ।

**न्यासकारः**

काशिकावृत्तेरुपरि काशिकाविवरणपञ्जिकानाम्नी या व्याकरणाचार्येण जिनेन्द्रबुद्धिना विरचिता सा परवर्तिकाले न्यासनाम्नैव ख्यातः । टीकाकर्तापि न्यासकाररूपेण समधिकपरिचितो जातः । मल्लिनाथेन टीकेयं सम्यगधीततेति तदीयटीकाध्ययनेनास्माभिर्ज्ञायते । तेन तस्य रघुवंशमहाकाव्यस्य सञ्जीविनीटीकायां व्याकरणदिशा विवेचनावसरे क्वचित् क्वचित् न्यासकारस्याभिमतं समुपनिबद्धम् । तथाहि –

"प्रियतमाभिरसौ तिसृभिर्बभौ - "[22] इत्यादिपद्यस्य टीकायां "अहिरण" इत्यत्र "ब्रह्मभ्रूणवृत्रेषु क्विप् " इति नियमस्य प्राथमिकत्वात् हन्तेः क्विपि प्रमाणमाह – ' 'यथाह न्यासकारः – प्रायिकश्चायं नियमः । क्वचिदन्यस्मिन्नप्युपपदे दृश्यते। मधुहा । प्रायिकत्वं च वक्ष्यमाणस्यव बहुलग्रहणस्य पुरस्तादपकर्षाल्लभ्यते" [23] इती ति ।

**भोजराजः**

ख्रीष्टाब्दीयैकादशशताब्द्याः प्रथमार्द्धे समाविर्भूतस्य सिन्धुराजपुत्रस्य धाराधिपतेर्भोजस्य विविधशास्त्रेषु पाण्डित्यमासीदिति तन्नाम्ना प्रचलितेभ्यो ग्रन्थेभ्यो विज्ञायते। तेन यथा सरस्वतीकण्ठाभरणं शृङ्गारप्रकाशश्चेत्यलंकारशास्त्रीयग्रन्थद्वयं विरचितं तथा तत्त्वप्रकाश (धर्मतत्त्वविषयकः), चम्पूरामायणश्चेति बहवो ग्रन्था अपि विरचिताः । स वैयाकरणोऽपि आसीत् । तेन सरस्वतीकण्ठाभरणं नाम अष्टाध्यायात्मकं व्याकरणमपि प्रणितम् । ग्रन्थोऽयं मल्लिनाथेन सम्यक् परिशीलितः । तेन तस्य रघुवंशमहाकाव्यस्य सञ्जीविनीटीकायां व्याकरणदिशा विवेचनावसरे क्वचित् क्वचित् भोजराजस्याभिमतं समुपनिबद्धम् । तथाहि –

''दृढभक्तिरिति ज्येष्ठे '' - [24] इत्यादिपद्यस्य टीकायां '' दृढभक्तिः' ' इत्यत्र दृढशब्दस्य पुंवद्भावे भोजराजस्योक्ताभिप्रायो मल्लिनाथेनैवं समुपन्यस्तः - '' भोजराजस्तु कर्मसाधनस्यैव भक्तिशब्दस्य प्रियादिपाठाद् भवानीभक्तिरित्यादौ कर्मसाधनत्वात् पुंवद्भावप्रतिषेधः । दृढभक्तिरित्यादौ तु भावसाधनत्वात् पुंवद्भावसिद्धिः पूर्वपदस्येत्याह'' [25] इति।

**उपसंहारः**

रघुवंशमहाकाव्यस्यार्थ परिस्फुटनार्थं यत्र यत्र व्याकरणविषयकमालोचनमपेक्षितं यथासम्भवं तत्र तत्र व्याकरणविषयिनी आलोचना मल्लिनाथेन प्रस्तुता । यद्यपि तेन किमपि व्याकरणशास्त्रं न प्रणीतं तथापि विविधानि व्याकरणशास्त्राणि सम्यगधीतानीति तदीयटीकाध्ययनेन विज्ञायते । तेन प्रायेण सर्वत्र पदानां व्याकरणदिशा विवेचनावसरे पाणिनिमतमेवानुसृतम् । अपि च व्याकरणनियमातिक्रमकारिणां प्रयोगाणामपि साधुत्वव्यवस्थापनं मल्लिनाथेन कृतम् । तेनैवमनुभूतम् – आदौ भाषा ततो व्याकरणमिति। तथाहि व्याकरणनिष्णातधियः कवयः यानेव शब्दान् व्यवहरन्ति व्याकरणद्वारा तेषां शब्दानां व्याख्यानमेव युक्तम् । विषयेऽस्मिन् मल्लिनाथस्यापरिसीमं पाण्डित्यमभिलक्ष्य स व्याकरणाचार्य आसीदिति वक्तुं शक्यते ।

**तथ्यसूत्रः**

1. रघु. 18/24.
2. पा.5/2/12
3. रघु.9/61
4. रघु. 2/1
5. रघु.2/70.
6. पा.4/3/11 – (का. वृ)।
7. रघु.3/34.
8. पा.5/3/98-(का.वृ)।
9. रघु.6/78.
10. पा.4/4/82 –(का.वृ)।
11. रघु.3/78
12. पा.3/4/72-(का. वृ) ।
13. रघु.19/50.
14. का.लं.सू.वृ-5/2
15. रघु.1/36
16. अ. को. 1/2/9
17. ऐ.
18. रघु.5/41
19. अ.को.2/2/10- क्षी.टी.
20. रघु.9/22
21. अ.को. 1/3/30- क्षी.टी.
22. रघु.9/23.
23. ''ब्रह्मभ्रणवृत्रेषु क्विप् '' (पा.3/2/87) इति सूत्रस्य काशिकावृत्तेरुपरि न्यासटीका ।
24. रघु.12/19
25. भोजराजस्यायमेवाभिप्रायः मेघदूतस्य 2/39 इति पदस्य, कुमारसम्भवस्य च 8/77 इति पद्यस्य टीकायां मल्लिनाथेन समुल्लिखितः ।

**सङ्केतसूची**

अ.को. --- अमरकोषः ।
क.वृ. --- काशिकावृत्तिः ।
का.ल.सू.वृ.--- काव्यालंकारसूत्रवृत्तिः ।
क्षी.टी.--- क्षीरस्वामिकृता टीका ।
पा. ---पाणिनिकृताष्टाध्यायी ।
रघु. --- रघुवंशम् ।

**सहायकग्रन्थाः**


1. आचार्यः, नारायणरामः कर्तृक संशोधितः । *काव्यालंकारसूत्राणि* । दिल्ली : मतिलाल वनारसीदासः, 1983 ।
2. खाटुया, कार्तिकचन्द्रः / *मल्लिनाथ-समीक्षा* । कलकाता : संस्कृतपुस्तकभाण्डारः, 2003 ।
3. चक्रवर्ती, सत्यनारायणः, सम्पादकः । *अष्टाध्यायीसूत्रपाठः* । कलकाता : संस्कृतपुस्तकभाण्डारः, 2012 ।
4. चक्रवर्ती, सत्यनारायणः । *पाणिनीय शब्दशास्त्र* । चक्रवर्ती, सत्यनारायणः, सम्पादकः ।

*अष्टाध्यायीसूत्रपाठः* । कलकाता : संस्कृतपुस्तकभाण्डारः, 2012 ।

5. दासः, करुणासिन्धुः, सम्पादकः । *वैयाकरणसिद्धान्तकौमुदी(सन्धिप्रकरणम्)* । कलकाता : संस्कृतपुस्तकभाण्डारः, 2004 ।
6. दासः, देवकुमारः, सम्पादकः । रघुवंशम् (प्रथमः सर्गः )। कलकाता : सदेशः 1416 वङ्गाब्दः ।
7. दासः गुरुचरणः, सम्पादकः । *लघुसिद्धान्तकौमुदी* । कल्याणी पावलिकेशन, 2012 ।
8. वन्ध्योपाध्यायः, सत्यवती । *मल्लिनाथेर व्याकरणप्रतिभा* । कलकाता : संस्कृतपुस्तकभाण्डारः, 2008 ।
9. वन्द्योपाध्यायः, अशोककुमारः, सम्पादकः । रघुवंशम् । कलकाता : सदेशः, 1420 वङ्गाब्दः ।
10. विश्वरञ्जनः, सम्पादकः । *वैयाकरणसिद्धान्तकौमुदी* (*समासप्रकरणम्*) । कलकाता : संस्कृतवुकडिपो, 2016 ।
11. भट्टाचार्य्यः, तपनशङ्करः सम्पादकः । अष्टाध्यायी । कलकाता : संस्कृतवुकडिपो, 2012.
12. मुखोपाध्यायः, सच्चिदानन्दः, सम्पादकः । *वैयाकरणसिद्धान्तकौमुदी (समासप्रकरणम्)* । कलकाता : साहित्यनिकेतन, 1972 ।
13. मिश्रः, धारादत्तः, अनुवादकः व्याख्याकारश्च । *रघुवंश-महाकाव्य* (*सम्पूर्ण*) । दिल्ली : मोतिलाल बनारसीदासः, 2014 ।